# CAMBRIAN PUBLIC SCHOOL

**KANKE ROAD, RANCHI**

**Revision Assignment**

**Subject: Sanskrit** **Class: IX**

**I.** अधोलिखितं गद्यांश पठित्वा प्रश्नानाम् उत्तराणि लिखत-

सामान्यजीवने अन्नं वस्त्रम्, आवासः, शिक्षा, स्वास्थ्यसेवा चेत्यादीनां मूलभूतानाम् आवश्यकतानां पूर्तये धनम् आवश्यकम्। पर्याप्तधनस्य अभावात् स्वकर्तव्यपालनं कठिनं भवति। स्वास्थ्य, शिक्षा, सेवा, दानम् चेत्यादीनि कार्याणि बाधितानि भवन्ति। दैनन्दिनजीवनं च असन्तुलितं भवति। अतः धर्मशास्त्रे चतुर्वर्गेषु धर्मार्थकाममोक्षेषु अर्थः अन्यतमः स्तम्भः इति गणयते।

1) एकपदेन उत्तरत-

a) सामान्यजीवने मूलभूतानाम् आवश्यकतानां यूर्तये किम् आवश्यकम् ?

b) कस्य अभावात् कर्त्तव्य पालनं कठिनं भवति ?

c) कानि कार्याणि बाधितानि भवन्ति?

d) किम् असन्तुलितं भवति ?

2) पूर्णवाक्येन उत्तरत-

a) पर्याप्तधनस्य अभावात् किं कठिनं भवति ?

b) चतुर्वगैषु धर्मार्थ काममोक्षेषु कः अन्यतमः स्तम्भः?

3) यथानिर्देशम् उत्तरत-

a) 'अन्यतमः स्तम्भः' अत्र विशेषणपदं किम् ?

b) 'कर्त्तव्यपालनं कठिनं भवति' अत्र क्रियापदं किम्?

c) 'कठिनम्' इत्यस्य विलोमशब्दं लिखत ।

**II.** मातामही - भोः कपिल ! माधवि ! किं कुरुतः?

कपिलः– मातामहि! पश्यतु किल। सः शुनकः आवयोः क्रीडायां मध्ये मध्ये प्रविश्य आवां पीडयति स्म। अतः आवां तं सम्यक् दण्डितवन्तौ । (पुनः उच्चैः हसितवन्तौ)

मातामही – वत्सौ, अधुना क्रीडया अलम्। कथां श्रोतुम् इच्छतः वा?

उभावपि–. मातामह्याः कथा ! रोचते मे कथा ... रोचते मे मातामही।

(मातामहीम् आलिङ्गितवन्तौ)

मातामही - उपविशताम्, सावधानेन शृणुतां च। अस्माकं भारतभूमिः अनेकेषां नररत्नानां ब्रह्मर्षीणां राजर्षीणां च प्रसवित्री। बहवः सत्पुरुषाः स्वीयकर्तृत्वेन जन्म सार्थकं कृतवन्तः । किं भवन्तौ महात्मानं नामदेवं जानीतः?

**1)** एकपदेन उत्तरत

a) कः आवयोः क्रीडायां प्रविश्य पीडयति स्म?

b) बालकौ कस्याः कथां श्रोतुम् इच्छतः?

c) भारतभूमिः केषां प्रसवित्री अस्ति?

**2)** पूर्णवाक्येन उत्तरत्

a) कपिलः शुनकं कुतः दण्डितवान्?

b) मातामही बालकाभ्यां किम् उक्तवती?

c) भारतभूमेः विषये मातामही किं कथयति?

**3)** यथानिर्देशम् उत्तरत-

a) 'रोचते' इति क्रियापदस्य कर्तृपदं लिखत।

b) 'आवां' इत्यस्य सर्वनामपदं लिखत।

c) 'पीडयति' इति धातोः लकारं लिखत।

**III.** अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत।

विश्वबन्धुत्वविस्तारकं संस्कृतम्

सर्वभूतैकताकारकं संस्कृतम् ।

सर्वतः शान्तिसंस्थापकं संस्कृतम्

पञ्चशीलप्रतिष्ठापकं संस्कृतम् ।।

**1)** एकपदेन उत्तरत l-

a) कस्य प्रतिष्ठापकं संस्कृतम् ?

b) सर्वतः शान्तिसंस्थापकं किम् ?

c) संस्कृतं कस्य विस्तारकम्?

**2)** पूर्णवाक्येन उत्तरत l

a) संस्कृतं कस्याः संस्थापकम् अस्ति?

b) केषाम् एकताकारकं संस्कृतम्?

**3)** यथानिर्देशम् उत्तरत।

a) विस्तारकं' इत्यस्य पदस्य कः अर्थः?

b) 'एकता' इति पदस्य विलोमपदं किम् ?

**IV.** शर्कराखण्डखाद्यानि दधिक्षीरघृतानि च।

आहारं भक्ष्यभोज्यं च नैवेद्यं प्रतिगृह्यताम् ।।

**1)** एकपदेन उत्तरत-

a) के नैवेद्यं प्रतिगृह्यताम् ?

b) कः आहारः प्रतिगृह्यते ?

c) शर्कराखण्डद्रव्याणि किम् ?

**2)** पूर्णवाक्येन उत्तरत-

a) केषां नैवेद्यं प्रस्तुतम् अस्ति ?

b) के के पदार्थाः नैवेद्यरूपेण अर्ण्यन्ते?

**3)** यथानिर्देशम् उत्तरत-

a) 'दधि' शब्दस्य अर्थः कः?

b) 'वरं' इति पदस्य विशेषणपदं किम् ?

c) 'मे' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

**V.** अधोलिखितपद्यांशस्य अन्वयं मञ्जूषातः उचितं पदं चित्वा पूरयत-

धर्मकामार्थमोक्षप्रदं संस्कृतम्
ऐहिकामुष्मिकोत्कर्षदं संस्कृतम्
कर्मदं ज्ञानदं भक्तिदं संस्कृतम्
सत्यनिष्ठं शिवं सुन्दरं संस्कृतम् ।।

अन्वय– संस्कृतं (i) .................. संस्कृतं ऐहिकामुष्मिकोत्कर्षदं
(ii) .................. कर्मदं ज्ञानदं (iii) .................. संस्कृतं सत्यनिष्ठ (iv) ................ सुन्दरम् (अस्ति)।

**<u>मञ्जूषा–-शिवं, संस्कृतं, धर्मकामार्थमोक्षप्रदं, भक्तिदं</u>**

**VI.** नैवेद्यं गृह्यतां देव भक्तिं मे ह्यचलां कुरु।
ईप्सितं मे वरं देहि परत्र च परां गतिम् ।।

**<u>अन्वयः</u>-** हे देव! (इदं) नैवेद्यं (i) ............. ,मे भक्तिं च हि (ii) ............. कुरु। मे ईप्सितं
(iii) ............. देहि, परत्र च (iv) ............. गतिं (देहि)।

***<u>मञ्जूषा</u>*** :-- **<u>गृह्यतां, अचलां, वरं, परां</u>**

**VII.** शर्कराखण्डखाद्यानि दधिक्षीरघृतानि च।
आहारं भक्ष्यभोज्यं च नैवेद्यं प्रतिगृह्यताम् ।।

**<u>अन्वयः—</u>** शर्करा-खण्ड (i) ..............दधि-क्षीर-घृतानि
(ii) ............. (तथा अन्य) भक्ष्य भोज्यं (iii) ............. च (इदं) (iv) ............. प्रतिगृह्यताम् ।।

**मञ्जूषा** : – **खाद्यानि, च, आहारं, नैवेद्यं**

**VIII.** जलबिन्दुनिपातेन क्रमशः पूर्यते घटः।

सः क्रमः सर्वविद्यानां धर्मस्य च धनस्य च॥

अन्वयः- (i) ............. जलबिन्दुनिपातेन. (ii) ............. पूर्यते। (iii) ............. सर्वविद्यानां धर्मस्य च (iv) .............च।

**मञ्जूषा - क्रमः, धनस्य, घटः, क्रमशः**

**IX.** रेखांङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत-

1) भारतदेशः बहूनां **ब्रह्मर्षीणां** भूमिः अस्ति।
2) **नामदेवमहाराजः** महाराष्ट्रस्य प्रसिद्धः महात्मा आसीत्।
3) कपिलः माधवी च **अवकाशकाले** मातुलगृहं गतवन्तौ।
4) खुदीरामः **देशभक्तेषु** तेजस्वी बालक्रान्तिवीरः आसीत्।
5) सः '**वन्दे मातरम्**' इति मन्त्रम् अघोषयत्।
6) क्रान्तिवीराः **आङ्ग्लानां** मनसि आतङ्कम् अजनयन्।
7) खुदीरामः हास्यमुखेन फासीदण्डम् अङ्गीकृतवान्।
8) तस्य हस्ते **भगवद्गीता** आसीत्।
9) कृतकबुद्धिः **मानवबुद्धेः** सहकरी अस्ति।
10) **चिकित्सायाः** क्षेत्रे कृतकबुद्धिः प्रयुज्यते।
11) **यन्त्राणि** मानववत् चिन्तयन्ति।
12) कृतकबुद्धिः **दत्तांशमाध्यमेन** शिक्षणं करोति।
13) **भयस्य** कारणं यथार्थम् अस्ति।
14) प्रेरणा तु **मानवेभ्यः** आगच्छति ।
15) **सुखस्य** मूलं धर्मः।

**X.** घटनाक्रमानुसारं लिखत-

(क) नामदेवः मन्त्रम् उच्चार्य श्रद्धया प्रणम्य नेत्रे उद्घाटितवान्।

ख) नामदेवः घृतपात्रम् आधृत्य अनुधावितवान्।

(ग) नामदेवः नैवेद्यस्थालिकां विग्रहस्य पुरतः स्थापितवान्।

(घ) शुनकः शुष्करोटिकाम् अपहृत्य पलायितवान्।

(ङ) शुनकस्य स्थाने पाण्डुरङ्गः आविर्भूतवान्।

(च) नामदेवः मन्दिरं गतवान्।

**XI.** (क) खुदीरामः हास्यमुखेन फासीदण्डम् अङ्गीकृतवान्।

(ख) तस्य जन्म 1889 तमे वर्षे मेदिनीपुरजनपदे अभवत्।

(ग) खुदीरामः प्रफुल्लः च किङ्ग्ज़फोस्य शकटस्य उपरि बम-यन्त्रं क्षिप्तवन्तौ।

(घ) बाल्यकाले एव तस्य पितरौ दिवङ्गतौ।

(ङ) सः सत्येन्द्रनाथस्य प्रभावेण क्रान्तिदीक्षाम् अगृह्णात्।

(च) खुदीरामः 'वन्दे मातरम्' इति ब्रुवन् आरक्षकैः गृहीतः ।

(छ) तस्य पालनं पोषणं च तस्य अग्रजया कृतम्।

(ज) मुज़फ्फरपुरे किङ्ग्ज़फोर्ड़ः नाम क्रूरः न्यायाधीशः आसीत्।

**********